(व.सं. अ.-३२ श्लो.-२३३प्र.पादः)
एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्ययोः ।
न [१५७]पुत्रीद्वयमेकस्मै न दद्यात्तु कदाचन ।।१६।। प्र.६
(व.सं. अ.-३२ श्लो.-२३८)
नैर्ऋत्यभोद्भूतसुतः सुता वा क्षिप्रादवश्यं श्वशुरं निहन्ति ।
तदन्त्यपादाज्जनितो निहन्ति नैवोत्क्रमेणाहिभवः कलत्रम् ।।१९-२०।। प्र.६
(व.सं. पेज-२९७ अ.-३२ श्लो.-२३९)
जनकं जननीं हन्ति भर्तुर्मूलाहिधिष्ण्यना ।२४२। प्र.६
(व.सं. अ.-३२ श्लो.-२४२प्र.पादः)
सुरेशताराजनिता धवाग्रजं द्विदैवताराजनिता च देवरम् ।२४०। प्र.६
(व.सं. अ.-३२ श्लो.-२४०प्र.पादः)
वश्यास्त्यक्त्वा राशयोऽन्ये नृभाणां
सिंहं तस्याप्येकमन्ये विधेयाः ।
कीटं त्यक्त्वा लोकतोऽन्यत्प्रसिद्धं
वश्यावश्यं नैव तोयालयाश्च ।।२३।। प्र.६
(व.सं. अ.-३२ श्लो.-२०१)
अश्वभमेषभुजगद्वयकुक्कुरौ तु मूषकमहान्दुरुगोलुलायाः ।
शार्दूलमाहिषगवारिमृगद्वयं[१५८] श्वा कीशोऽथ बभ्रुयुगकीशगवाश्वसिंहाः। ।।
गोकुञ्जराविति यथाक्रममाश्विनादिभानां भवन्ति खलु कल्पितयोनिरूपाः ।२५-२६ प्र.६
(व.सं. अ.-३२ श्लो.-१८१,१८२प्र.पा)
आवृत्तिभिर्भैस्त्रिभिरश्विभाद्यं क्रमोत्क्रमात्सङ्गणयेदुडूनि[१५९]।

---

१५६ भिलाषी
१५७ पुत्रिका
१५८ द्वयाश्वशाखामृगोक्षकपि पञ्चमुखाश्च सिंहा
१५९ च्च भानि

यद्येकपर्वण्युभयोश्च धिष्ण्ये नेष्टा नृनार्योर्भृशमेकनाडी ।।
सा मध्यनाडी पुरुषं निहन्ति तत्पार्श्वनाडी खलु कन्यकां तु[१६०]।
आसन्नपर्यायसमागता चेद्वर्षेण साप्यन्तरिता त्रिवर्षैः ।।३४।। प्र.६
(व.सं. अ.-३२ श्लो.-२०२,२०३)
दम्पत्योर्जन्मभे चैक्ये राशौ च निधनं तयोः ।
एकस्य च तथोद्वाहे किञ्चिद्भेदेऽपि वा न च ।।३५।। प्र.६
(व.सं. अ.-३२ श्लो.-१६)
अज्ञातजन्मनां नृणां नामभे[१६१] परिकल्पना[१६२]।
तेनैव चिन्तयेत्सर्वं राशिकूटादि पूर्ववत् ।।
जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन नामभम् ।
व्यत्ययेन यदा योज्यं दम्पत्योर्निधनप्रदम् ।।१९५।। प्र.६
(व.सं. अ.-३२ श्लो.-१९५,१०६)
एकविंशन्महादोषास्त्वन्ते ब्रह्ममुखोदिताः ।।
कदाचिन्नैव सीदन्ति गुणानां कोटि कोटिभिः ।
तस्मादेतेषु दोषेषु कदाचिन्नाचरेच्छुभम् ।।
विवाहे विधवा नारी मरणं व्रतबन्धने ।
ग्रामनाशः प्रतिष्ठायां सीमन्ते गर्भनाशनम् ।।
नवान्नभोजने मृत्युः कृषौ तत्फलनाशनम् ।
कर्तृनाशो गृहारम्भे प्रवेशे पतिनाशनम् ।।
यात्रायां कर्तृनाशः स्याद्युद्धयाने विशेषतः ।
लभ्यते सुमहापुण्यमेषु श्राद्धादिकर्मभिः ।।३८।। प्र.६
(व.सं. अ.-४२ श्लो.-१०७द्वि.पादः,श्लो.१०८,१०९,११०,१११)
लग्नं तदर्द्धं च ततस्त्रिभागो नवांशकश्च द्विदशांशकश्च[१६३]।
त्रिंशांशकश्चेति हि वर्गषट्कं शुभं[१६४] व्योमचराधिपत्यम् ।।४२।। प्र.६

---

१६० च
१६१ येत्
१६२ नामभ
१६३ द्विरसांशकश्च
१६४ शुभाशुभं

(व.सं. अ.-३२ श्लो.-१३५)
यदन्तरालं पितृसार्पयोश्च[१६५] मूलेन्द्रयोरश्विनपौष्णयोश्च ।
भसन्धिगण्डान्तमिति [१६६]त्रयं तद्यामप्रमाणं शुभकर्म हन्ति ।।४३।। प्र.६
(व.सं. अ.-३२ श्लो.-६४)
लग्नान्तरालं घटिकार्द्धमेतत्कुलीरहर्योरलिचापयोश्च ।
मीनाजयो: सर्वगुणान्निहन्ति लोभो यथा सर्वगुणान्नरस्य ।।४३।। प्र.६
(व.सं. अ.-३२ श्लो.-६७)
पक्षोऽब्दसन्धिस्त्रिदिनं च माससन्धिस्त्रिनाड्य:[१६७] खलु सन्ध्ययोश्च ।
नाड्यश्चतस्त्रस्तिथिऋक्षयोगं[१६८] सन्धिस्तदर्द्धं करणस्य सन्धि:।।४३।। प्र. ६
(व.सं. अ.-३२ श्लो.-१९प्र.पाद:,१८द्वि.पाद:)
क्रूरग्रहमध्यगते लग्ने चन्द्रेऽथवा करग्रहणम् ।
ते यमसदनाभिमुखं गमनं चेच्छन्ति कन्याया: ।।४४।। प्र.६
(व.सं. अ.-३२ श्लो.-४५)
दारिद्र्यं रविणा कुजेन मरणं सौम्येन न स्यु: प्रजा: ।
दौर्भाग्यं गुरुणा सितेन सहिते चन्द्रे ससापत्न्यकम् ।
प्रव्रज्यार्कसुतेन सेन्दुजगुरौ वाच्छन्ति केच्छिुभम् ।
व्याध्यैर्मृत्युरसदग्रहै: शशियुतैर्दीर्घ: प्रयास: शुभै: ।।४५।। प्र.६
(व.सं. अ.-३२ श्लो.-४२)
कुर्वंत्युद्वाहितां कन्यां विधवां वत्सरत्रयात् ।
अन्यस्मिन्मङ्गले ताश्च निधनं वाऽथ निर्द्धनम् ।।४८..५१।। प्र.६
(व.सं. अ.-३२ श्लो.-८२)
शुक्ले द्वितीयादित एव कृष्णपक्षे दशम्यन्तगता:[१६९] प्रशस्ता:।
तास्वष्टमीस्कन्दगणेशदुर्गाश्चतुर्दशी चापि तिथिर्विवर्ज्या ।।
वारा: प्रशस्ता: शुभखेचराणां सूर्यार्किवारौ खलु मध्यमौ तौ ।

---

१६५ धिष्ण्ये
१६६ द्वयं तन्नाडय:
१६७ नाडयोभय
१६८ योगे सन्धिर्द्विपादं
१६९ गता: शुभा: स्यु:

त्याज्यः सदा भूमिसुतस्य वारः कामार्कतिथ्योरपि तौ प्रदोषौ।।५४।। प्र.६
(व.सं. अ.-३२ श्लो.-४,६)
स्वात्या[१७०] मघायां निर्ऋतौ [१७१]ध्रुवान्त्यमित्रेन्दुहस्तेषु च कन्यकानाम् ।
पाणिग्रहस्त्विष्टफलप्रदः स्यादविद्धभेष्वेव गुणान्वितानाम् ।।५५।। प्र.६
(व.सं. अ.-१४ श्लो.-६९)
अतोऽन्त्यपादमादिगो द्वितीयगस्तृतीयगम् ।
तृतीयगो द्वितीयकं चतुर्थगस्तु चादिमम् ।।
भिनत्ति वेधकृद् ग्रहो न चान्यपादमादरात् ।
असम्भवाच्छशीनयोर्दृशोः समत्वमत्र वै ।।
विषप्रदग्धेन हतस्य पत्रिणा मृगस्य मांसं शुभदं क्षतादृते।
तथैव पादो न शुभोऽवशिष्टाः पादाः शुभाश्चेति पितामहेन ।।५६।। प्र.६
(व.सं. अ.-३२ श्लो.-७३,७४,७२)
उत्पातभं ग्रहणभं क्रूरविद्धं स्थितं च यत्[१७२]।
दहतीव शुभं कर्म राघवाग्निशरोम्बुधिम् ।।५८।। प्र.६
(व.सं. अ.-३२ श्लो.-९९)
गन्तव्यधिष्ण्यं खलु मुक्तभं यत्क्रूरैर्महोत्पातविदूषितं [१७३]च।
चन्द्रोपभोगादमलं तदानीं शुभेषु कार्य्येषु शुभप्रदं च ।।५८।। प्र.६
(व.सं. अ.-३२ श्लो.-१०९)
रविभादहिपितृमित्रत्वाष्ट्रभहरिपौष्णभेषु गणितेषु।
अश्विनभादिन्दुयुतौ तावति वै पतति गणनया पातः।।
अयमपि पातो दोषचण्डीशचण्डायुधाह्वयो ज्ञेयः।
अखिलेषु मङ्गलेष्वपि वर्ज्यो यस्माद्विनाशदः कर्तुः।।६०।। प्र.६
(व.सं. अ.-२१ श्लो.-५,६)
दोषो महापात इति प्रसिद्धः स वैधृतो हन्ति वधूं वरं च ।
तं रक्षितुं लग्नगुणास्त्वशक्ताः[१७४] स्वबान्धवास्तेऽशनिनोपघातम् ।।६१।। प्र.६

---

१७० स्वातौ
१७१ ध्रुवेषु मित्रेन्दु
१७२ भम्
१७३ तत्

(व.सं. अ.-३२ श्लो.-९३)
शास्त्रात्समानीतमहातिपात: सवैधृतो हन्ति वधूं वरं च ।
त्रिसप्तवाराणि च जामदग्न्यो क्रोधोऽचिरात्क्षत्रकुलं समस्तम् ।।६१।। प्र.६
(व.सं. अ.-३२ श्लो.-९४)
एकान्तरा दिनपतौ [१७५]दिवसे द्वितीया पूर्वान्त्यचापघटयोर्घटमोक्षयोश्च ।
कर्काजयोर्मिथुनकन्यकयोश्च कीटहर्योस्तुलामकरयो: खलु मासदग्धा: ।।
मासदग्धासु तिथिषु कृतं यन्मङ्गलादिकम् ।
तत्सर्वं नाशमायाति ग्रीष्मे कुसरितो यथा ।।६६।। प्र.६
(व.सं. अ.-१२ श्लो.-२५,२६)
इष्टोदयांशे निजपत्यदृष्टे वरस्य मृत्युस्तदसंयुते वा ।
अस्तांशकेऽप्येवमदृष्टयुक्ते स्वस्वामिना नाशमुपैति कन्या ।।७६।। प्र.६
(व.सं. अ.-३२ श्लो.-९६)
उदयांश: स्वनाथेन मित्रसौम्येन संयुत: ।
प्रेक्षितो वा तथास्तांशो दम्पत्यो: पुत्रपौत्रद: ।।७७।। प्र.६
(व.सं. अ.-३२ श्लो.-९७)
[१७६]विषुवतोरयनयोर्दिनत्रयं हरिपदे षडशीतिमुखेषु च ।
पूर्वतोऽपि परतोऽपि संक्रमान्नाडिकाश्च खलु षोडश [१७७]त्यजेत् ।।
संक्रान्तिदोषे त्वचिरात्कृतं यदुद्वाहपूर्वाखिलमङ्गलाद्यम्[१७८] ।
लाक्षासमूहं ज्वलिताग्निमध्ये विलीयते यद्वदशेषमेतत्[१७९] ।।७९।। प्र.६
(व.सं. अ.-३२ श्लो.-३७,३८)
लग्ने[१८०] हि सर्वे खलु राशयश्च शुभेक्षिताश्चाथ युता: शुभा: स्यु: ।
नवांशकास्तौलिनृयुग्मवत्यश्चापार्द्धभाग: शुभदो न चान्ये ।।

---

१७४ अशक्ता:
१७५ दिवसाद्द्वितीयाच्चापान्त्ययोर्वृषभकुम्भभयोश्च तद्वत
१७६ ऽयनतोऽपि दिनत्रयं
१७७ षोडश
१७८ मङ्गलौधम्
१७९ कोटि:
१८० लग्नादि

द्विभर्तृका मेषनवांशके स्याद्वृषांशके सा[१८१] पशुशीलयुक्ता ।
धनान्विता पुत्रवती तृतीये कुलीरकांशे कुलटाप्यजस्रम् ।।
सिंहांशके सा पितृमन्दिरस्था कन्यांशके वित्तयुता सुशीला ।
तुलांशके सर्वगुणास्पदा सा कीटांशके निःस्वतरा विशीला ।।
चापांशकाद्ये धनिनी द्वितीये भागेऽन्यसक्ता मलिनी गदाढ्या ।
निःस्वा मृगांशे विगुणा घटांशे विभर्तृका योगरता विशीर्णा ।।
मीनांशके [१८२]भर्तृयुतार्थहीना शुभग्रहैर्युक्तनिरीक्षितेऽपि ।
तस्मात्सदैवोक्तनवांशकेषु कुर्याद्विवाहं गुणसंप्रवृद्धयै ।।
नवांशदोषः सकलं गुणौघं लग्नोत्थसौम्यग्रहसम्भवं च ।
[१८३]ध्रुवं निहन्तीव वृकोऽजसंघं षट्वर्गजं सौम्यवियच्चराणाम् ।।८४।। प्र.६
(व.सं. अ.-३२ श्लो.-४७,४८,४९,५०,५१,५४)
प्रीतिर्बुद्धिः सुगुणनिरतिर्बन्धुपूजा सुताप्ति-
[१८४]सदैवपक्ष्यं तनयरहितं त्वन्यथा भर्तृनाशः।
धर्मे बुद्धिर्भवति धरणीलब्धिरत्येव [१८५]बुद्धि-
र्हानिः स्त्रीणां हिमकरसुते लग्नभावादिसंस्थे ।।८७।। प्र.६
(व.सं. अ.-३२ श्लो.-१४८)
लक्ष्मीप्राप्तिर्भवति सुयशः प्रीतिरन्योन्यवृद्धि-
[१८६]रिष्टाप्राप्तिर्बहुविधभयं चाश्रमाणां विरक्तिः।
पापासक्तिः सुकृतनिरतिर्भूरिलाभः सुरेज्ये ।
स्त्रीणां सौख्यं रिपुकृतभयं लग्नभावादिसंस्थे ।।
भोगप्राप्तिर्विविधविभवः स्वैरवृत्तिर्महत्त्वम् ।
धूम्राधिक्यं भवति निधनं सर्वनाशो वसुत्वम्[१८७]।

---

१८१ स्यात्
१८२ भतृसुताथ
१८३ दत्त
१८४ निर्वैपक्ष्यं तनयरहितत्वं तनुत्यागचिन्ता ।
१८५ लाभमत्यन्तवृद्धि-
१८६ वाप्ति
१८७ व्यसुत्वम्

तथ्ये प्रीतिर्बहुविधगुण: सर्वसंपत्समृद्धि-
रस्वं स्त्रीणामुशनसि [188]तथा लग्नभावादिसंस्थे ।।८७।। प्र.६
(व.सं. अ.-३२ श्लो.-१४९,१५०)
मृत्युर्नै:स्वं बहुविधधनं भ्रातृहानि: प्रजानाम् ।
व्याधि: सौख्यं बहुविधमतो भर्तृहानिश्चिरायु:[189]।
श्रेयो हानिर्भवति हृदये व्याधिरर्थागमश्च ।
भानौ स्त्रीणामतिशयरुजा लग्नभावादिसंस्थे ।।
नाश: संपद्बहुविधयशोबन्धुवृद्धि: प्रजाप्ति:[190] ।
शस्त्रान्मृत्युर्भवति न चिराद्दीर्घसापत्न्यबाधा ।
प्रव्रज्यात्वं दुहितृजननं[191] वर्धनं भोगभाक्त्वम् ।
दास्यं स्त्रीणां तुहिनकिरणे लग्नभावादिसंस्थे।।
मृत्यु: शोको बहुविधधनं भ्रातृवैरं कुबुद्धि-
र्लक्ष्मीप्राप्तिर्भवति मरणं चोभयोर्वित्तनाश: ।
स्त्रीणां [192]द्वेषो व्यसननिरति: पुत्रपौत्रार्थसिद्धि-
भीतिर्भूमेर्बलिनि तनये लग्नभावादिसंस्थे ।।
स्वच्छन्दत्वं कदशनरतिर्वल्लभत्वं विशील्यम् ।
व्याधि: सुश्रीर्मृतिरथ सुखं गर्भपातप्रवृत्ति:।
द्यूतासक्तिर्भवति रविजे वैभवं वक्त्ररोग: ।
स्वर्भानौ वा[193] शिषिनि च तथा लग्नभावादिसंस्थे ।।८७।। प्र.६
(व.सं. अ.-३२ श्लो.-१४५,१४६,१४७,१५१)
ये लग्नदोषा: कुनवांशदोषा: पापै:[194] कृता दृष्टिनिपातदोषा: ।
लग्ने गुरुस्तान्विमलीकरोति फलं यथाम्भ: कतकद्रुमस्य ।।९०।। प्र.६

---

१८८ तदा
१८९ हानिक्रिरायु:
१९० प्रजार्ति:
१९१ जनितात्वं धनं
१९२ द्वेष्य
१९३ वाप्यथ शिखिनि वा
१९४ पापगृहै

(व.सं. अ.-३२ श्लो.-१३०)

प्रकरण - १०

मूलत्रिकोणस्वगृहोच्चमित्रगृहस्थितैर्वापि तदंशसंस्थैः ।
शुभे विलग्ने सततं ग्रहेन्द्रा दिशन्ति लक्ष्मीं विपुलां च कीर्तिम् ।।१।। प्र.१०
(व.सं. अ.-३३ श्लो.-२)
स्वनीचगैः [१९५]शत्रुगृहस्थितैश्च तदंशसंस्थैः स्वगृहोपगैर्वा।
पापोदये शोकभयं [१९६] स्वकीर्तिं दिशन्ति राज्ञां भृशमम्बराटाः[१९७]।।१।। प्र.१०
(व.सं. अ.-३३ श्लो.-३)
आधानजन्मेशदशाधिनाथरवीन्दुभौमेज्यसितैर्बलिष्ठैः[१९८]।
उत्पातदोषादिविवर्जितेषु पदं स्थिरं स्याच्च नराधिपानाम्[१९९]।।१।। प्र.१०
(व.सं. अ.-३३ श्लो.-१)
रिक्तास्वमायां बुधभौमवारविवर्जिते वारदिनेषु चैव ।
खले दिने ऋक्षनिशे[२००] तथैव न नैधने भे त्वभिषेक इष्टः ।।१।। प्र.१०
(व.सं. अ.-३३ श्लो.-५)
शीर्षोदये चोपचये गृहे वा स्वजन्मलग्नादथ लग्नगेऽपि ।
शुभग्रहैर्युक्तनिरीक्षिते वा पदं स्थिरं स्यात्सततं [२०१]हि राज्ञाम् ।।२।। प्र.१०
(व.सं. अ.-३३ श्लो.-४)
[२०२] त्रिकोणकेन्द्रत्रिधनेषु सौम्यैस्त्रिषष्ठलाभारिगतैश्च पापैः ।

---

१९५ वैरिगृहोदिगैर्वा ह्यस्तङ्गतैर्वक्रमुपागतैर्वा
१९६ त्वकीर्ति
१९७ भृंशमन्तरायम्
१९८ र्बलस्थैः
१९९ धराधिपानामभिषेक इष्टः
२०० निशीशयोश्च
२०१ च
२०२ केन्द्रेत्रिकोण त्रिधनाय

षष्ठाष्टलग्नव्ययवर्जितेन चन्द्रेण राज्ञां शुभदोऽभिषेकः ।।२।। प्र.१०
(व.सं. अ.-३३ श्लो.-८)
पापग्रहैः स्वान्त्यगतैश्च निःस्वो रोगी विलग्नोपगतैर्भवेत्सः ।
पदच्युतः सप्तचतुर्थसंस्थैः पुत्रस्थितैः सर्वसुखैर्विहीनः ।।३।। प्र.१०
(व.सं. अ.-३३ श्लो.-६)
यस्याभिषेके पुरुहूतमन्त्री लग्ने त्रिकोणे यदि वा भवेत्सः ।
षष्ठे कुजः कर्मगतश्च शुक्रः स मोदते विक्रमराज्यलक्ष्म्या ।।४।। प्र.१०
(व.सं. अ.-३३ श्लो.-९)
दुश्चिक्यलाभारिगता विनार्की स्वस्थेऽमरेज्ये यदि बन्धुगेहे[२०३]।
यस्यात्र योगे क्रियतेऽभिषेकश्चिरायुषस्त्वस्य पदं स्थिरं स्यात् ।।४।। प्र.१०
(व.सं. अ.-३३ श्लो.-१०)

प्रकरण - ११

परविषये विजयार्थं गन्तुर्यात्रा तु समरविजयाख्या।[२०४]
निखिलापरयात्रा या सामान्या सा भवेद् द्विविधा।।[२०५]
कथिततिथिवासरर्क्षेष्वभिमतफलदा भवेच्च सामान्या ।
समराह्वया च यात्रा योगविलग्नक्षितीशयोगेषु ।।१ पूर्व।। प्र.११
(व.सं. अ.-३७ श्लो.-३,४)
निखिलगुणयुतानां[२०६] राज्ञां कथयामि विधानमत्र यात्रायाः ।
जातकमवलोक्य वदेत्फलसिद्धिस्त्वन्यथा मृषा भवति ।।१।। प्र.११
(व.सं. अ.-३७ श्लो.-१) प्र.११
जन्मराशौ लग्नगते तदीशे वापि[२०७] लग्नगे।
[२०८]अथ लाभप्रदा यात्रा राशीशश्चेच्छुभग्रहः ।।

---

२०३ बन्धुजे ज्ञे
२०४ परविषयविजयार्थं गन्तुर्वा समरयात्राख्या ।
२०५ निखिला परयात्रा या सामान्यां भुवि भवेद्विविधा
२०६ युतस्य
२०७ वा विलग्नगे

जन्मलग्ने लग्नगते [209]तदीशे वापि लग्नगे।
अत्यन्तफलदा यात्रा तदीशश्चेच्छुभग्रहः ।।
जन्मराशिविलग्नाभ्यां लग्ने [210]वोपचये गृहे ।
सम्पूर्णफलदा यात्रा [211]तथैव विजयप्रदा ।।२।। प्र.११
(व.सं. अ.-३७ श्लो.-६५,६८,७१)
वलक्षपक्षे प्रतिपत्यप्रयाणे भङ्गप्रदा वा निधनप्रदा वा ।
यातुर्मनोभीष्टकरा द्वितीया सम्पूर्णयात्राफलदा तृतीया ।।
तिस्रोऽपि रिक्तास्तिथयः प्रयातुर्मृत्युप्रदाश्चार्थविनाशदा वा ।
यशस्करी भूरिधनप्रदा च या पञ्चमी मृत्युकरी च षष्ठी ।।९।। प्र.११
(व.सं. अ.-३७ श्लो.-१७प्र.पादः,१८द्वि.पादः)
सप्तमी विजयदा [212]ह्यथाष्टमी शोकदुःखभयदामयप्रदा ।
सर्वदुःखशमनी यशस्करी लाभदा च दशमी निरन्तरम् ।।
पशुप्रदा मानकरी सुगन्धरक्ताम्बरानेकशुभप्रदा स्यात् ।
एकादशी चित्रमृगप्रभूतधान्याकराद्युत्तमवस्तुदा स्यात् ।।
भूरिभूतिनाशिनी भूरिधर्महारिणी
भूरिभीतिदायिनी द्वादशी प्रभङ्गदा ।
त्रयोदशी सुभोगदा विपक्षपक्षनाशिनी
विनाशदाथ पूर्णिमा यशःक्षयं करोत्यमा[213] ।।९।। प्र.११
(व.सं. अ.-३७ श्लो.-१९,२०,२१,२२)
पौष्णद्वयादित्यकरेज्यमित्रमिन्दुर्हरीवासवभानि[214] यानि।
श्रेष्ठानि यात्रासु नवैव तानि मुक्त्वा त्रिपञ्चादिमसप्तभानि ।।९।। प्र.११
(व.सं. अ.-३७ श्लो.-२५)

---

२०८ अभीष्टफलदा
२०९ तद्वर्गे वा विलग्नगे
२१० चोपचये
२११ त्वथवा
२१२ तथाष्टमी
२१३ करोति वा
२१४ विष्णिवन्दुवस्वाह्वयभानि

पुरुहूतदिशं पुरन्दरर्क्षे नेयाद्याम्यदिशं त्वजाङ्घ्रिधिष्ण्ये ।
जलनाथदिशं पितामहर्क्षे शूलाख्यानथ सौम्ययमर्क्षे ।।१०।। प्र.११
(व.सं. अ.-३७ श्लो.-२७)
शूलसंज्ञानि[215] धिष्ण्यानि शूलसंज्ञाश्च वासरा: ।
यायिनां मृत्युदा: शीघ्रमथवा चार्थहानिदा:[216]।।१०।। प्र.११
(व.सं. अ.-३७ श्लो.-३०)
राहुस्थितर्क्षं तस्यास्यं पुच्छं पञ्चदशं तत: ।
तदेव [217]केतुर्विज्ञेय: सदा राहु: प्रतीपग: ।।
त्रयोदश च देयानि धिष्ण्यान्युभयपार्श्वयो: ।
मुखभागो मृते: पक्षे[218] जीवपक्षस्तु पृष्ठग: ।।१४।। प्र.११
(व.सं. अ.-३७ श्लो.-५४,५५)
जीवपक्षगयो: सूर्यचन्द्रयो: सन्धिमादिशेत् ।।
उभौ पराजितौ ज्ञेयौ मृतपक्षगयोस्तयो: ।।१५।। प्र.११
(व.सं. अ.-३७ श्लो.-५८द्वि.पाद:,५९प्र.पाद:)
रवि: स्थायी शशी यायी तद्वशाच्च जयाजयौ ।
[219]मृतपक्षगते भानौ जीवपक्षगते विधौ।।
जीवपक्षे गते सूर्ये मृतपक्षे गते विधौ।
यायिनां विजयस्तत्र स्थायिनां च पराजय: ।।१५।। प्र.११
(व.सं. अ.-३७ श्लो.-५६,५७)
चन्द्रे पुच्छे मुखे सूर्ये जय: स्वल्पोऽपि यायिनाम् ।।
व्यत्यये व्यत्ययफलं [220]युद्धेऽप्येवं विचिन्तयेत् ।
यात्रायामपि सर्वत्र चिन्तनीयं प्रयत्नत: ।।१५।। प्र.११
(व.सं. अ.-३७ श्लो.-५९द्वि.पाद:,६०)

---

२१५ शूलाख्यानि च
२१६ ऽश्वादिहानिदा:
२१७ केतुभंज्ञेयं
२१८ मृतपक्षो
२१९ जीवपक्षस्थिते सूर्ये मृतपक्षगते विधौ
२२० युद्धेष्वेव

कुलभेषु च ये[२२१] जातास्ते मनुजा भवन्ति कुलमुख्याः ।
उपकुलभे परविभवाद्भोक्तारस्त्वन्यभेषु सामान्याः ।।१७।। प्र.११
(व.सं. अ.-१४ श्लो.-८८)
यद्दिग्द्वारं मन्दिरं तद्दिगृक्षैरुक्तर्क्षैः स्यात्सन्निवेशो न सर्वैः ।३६/१। प्र.११/१३
(व.सं. अ.-३८ श्लो.-१७)
पुष्यार्काश्विनमैत्राणि सर्वदिग्द्वारकाणि[२२२] च ।
सर्वदिक्ष्वपि [२२३]यात्रायां सर्वकामार्थदानि च ।।३८।। प्र.११
(व.सं. अ.-३७ श्लो.-३२द्वि.पादः,३३प्र.पादः)
वसुभस्योत्तरार्द्धाच्च पञ्चधिष्ण्येषु सर्वदा ।
याम्यदिग्यायिनां नऽणां [२२४]न मुहूर्तो जयप्रदः ।।३८।। प्र.११
(व.सं. अ.-३७ श्लो.-७६)
मृगगणमध्ये सिंह उडुगणमध्ये तथैव पुष्यश्च ।
निजबलसहितोऽप्येवं त्रिविधोत्पातैर्न शक्तिमान्निहितः ।।३८।। प्र.११
(व.सं. अ.-१४ श्लो.-८०)
एकार्गलहतं धिष्ण्यं क्रूराक्रान्तं च विद्धभम् ।
उत्पातदूषितं [२२५]यत्तद्यात्रायां भङ्गदं सदा।।३८।। प्र.११
(व.सं. अ.-३७ श्लो.-८१)
सर्वस्मिन्नपि समये सर्वासु च दिग्विदिक्ष्वेव ।
सर्वद्वारिकधिष्ण्यान्यभिशुभदान्यतुलमखिलनृणाम् ।।३८।। प्र.११
(व.सं. अ.-१४ श्लो.-७६)
एकोऽपि [२२६]वक्रगः खेटो [२२७]लग्नस्थो वारराशिगः।
नीचस्थो वा तदंशस्थो [२२८]यात्राफलविनाशनः ।।३८।। प्र.११

---

२२१ यातास्ते
२२२ भानि
२२३ यात्रायां
२२४ दुःखदा भङ्गदाऽपि वा
२२५ यत्र यात्रा भङ्गप्रदा
२२६ चक्रगः
२२७ लग्नस्थश्चारिराशिगः

(व.सं. अ.-३७ श्लो.-३६)
बलप्रदास्य खेटस्य वारवर्गः शुभप्रदः ।
इतरग्रहवारादिर्यात्रायामशुभप्रदः ।।३८।। प्र.११
(व.सं. अ.-३७ श्लो.-८०)
यात्रेष्टसिद्धिदार्केन्दोरेकायनगयोस्तयोः ।
भिन्नायनगयोरह्नि निशि चेदन्यथा वधः ।।३९।। प्र.११
(व.सं. अ.-३७ श्लो.-६१)
पश्चादभ्युदिते शुक्रे [229]यायात्प्राचीं तथोत्तराम् ।
प्राच्यामभ्युदिते शुक्रे प्रतीचीं दक्षिणां दिशम् ।।४०।। प्र.११
(व.सं. अ.-३७ श्लो.-९३)
तद्दोषशमनार्थाय शान्तिं वक्ष्ये समासतः ।
कृत्वा शान्तिं प्रयत्नेन पश्चात्कार्यं समाचरेत् ।।
भृगोर्लग्ने भृगोर्वर्गे भृगोर्वारे भृगूदये ।
उपोष्य भृगुवारेऽपि यावच्छुक्रोदयं व्रती ।।
रजतेन [230]च शुद्धेन प्रतिमां कारयेद्भृगोः ।
लिखेदष्टदलं पद्मं कांस्यपात्रे च तण्डुलैः ।।
शुक्लसूक्ष्माम्बरैर्वेष्ट्य प्रतिमां तत्र पूजयेत् ।
शुक्लपुष्पाक्षतैर्गन्धैर्मुक्ताहारैर्विचित्रितैः ।।
उपचाराणि कार्याणि शुक्रं ते अन्यदित्यृचा ।
तन्मन्त्रेण जपं कुर्यात्सम्यगष्टोत्तरं शतम् ।।
कर्मान्ते तेन मन्त्रेण भक्त्या चार्घ्यं प्रदापयेत् ।
श्वेतगन्धाक्षतैः पुष्पैः [231]क्षीरमिश्रेण वारिणा ।।
दैत्यमन्त्री दिवादर्शी चोशना भार्गवः कविः ।
श्वेतोऽथ मण्डली काव्यो विधिस्थो भृगवे नमः ।।
[232]दत्त्वेत्यर्घं प्रयत्नेन प्रार्थयेच्चैव भक्तितः ।

---

२२८ काले विनाशदः
२२९ तस्मिन्प्रतीचीं
२३० सशुद्धेन
२३१ क्षीरमिश्रितवारिभिः

अनेनैव च मन्त्रेण प्राञ्जलिः प्रणतः स्थितः ।।
त्वपूजयाऽनया [२३३]शुक्रसम्मुखत्वसमुद्भवम्।
दोषं विनाशाय क्षिप्रं रक्ष मां तेजसां निधे ।।
इति प्रार्थ्य प्रयत्नेन प्रतिमा भूषणान्विता ।
दैवज्ञायैव दातव्या श्वेताश्वसहितेन च ।।
शिष्टेभ्यो दक्षिणां दद्याद्यथावित्तानुसारतः ।
ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ।।
एवं यः कुरुते सम्यक्प्रतिशुक्रप्रपूजनम् ।
न तस्य सम्मुखो दोषो विजयी चार्थवान्भवेत् ।।
इतरेषां ग्रहाणां च पूजां कुर्यात्प्रयत्नतः ।
तत्तत्सन्मुखजं दोषं तत्क्षणादेव नश्यति ।।
सूर्याय कपिलां दद्याच्छङ्खं चन्द्रमसे [२३४]तथा।
कुजाय वृषभं दद्यात्स्वर्णं दद्याद्बुधाय च ।।
गुरवे पीतवस्त्रं [२३५]चाश्वं सितायासिताय गाम्।
एवं प्रयत्नतः कृत्वा सर्वान्कामानवाप्नुयात[२३६] ।।४०।। प्र.११
(व.सं. अ.-३७ श्लो.-९९ तः ११३)
प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो [२३७]नृपः।
बलेन [२३८]शुक्रतुल्योऽपि हतसैन्यो निवर्तते ।।४१।। प्र.११
(व.सं. अ.-३७ श्लो.-९५)
सम्मुखे चन्द्रजे यत्र मार्गमध्योदिते यदि ।
यावदस्तमिते तस्मिंस्तावत्तत्रैव संवसेत् ।।४२।। प्र.११
(व.सं. अ.-३७ श्लो.-९)

---

२३२ दत्त्वा ह्यर्धं
२३३ शुक्र मे सन्मुखसमुद्भवम् ।
२३४ ऽपि च
२३५ च सिताय सितलोहकम्
२३६ वाप्स्यति
२३७ नरः
२३८ शक्र

जन्मराशौ लग्नगते तदीशे वा विलग्नगे।
अभीष्टफलदा यात्रा राशीशश्चेच्छुभग्रहः।।४३।। प्र.११
(व.सं. अ.-३७ श्लो.-६५)
[२३९]स्वाष्टलग्ने लग्नगते राशौ वा लग्नगे सति ।
यातुर्भङ्गो भवेत्तत्र द्वादशे वान्यलग्नगे ।।४५।। प्र.११
(व.सं. अ.-३७ श्लो.-६२)
वर्गोत्तमांशगे लग्ने त्वथवापि सुधाकरे ।
यात्रा कामदुघा यातुर्माता पुत्रस्य वै यथा ।।४६।। प्र.११
(व.सं. अ.-३७ श्लो.-७२)
पूर्वादि दिक्षु मेषाद्या क्रमाद्दिग्द्वारराशयः।
दिग्द्वारराशयः सर्वे तद्दिग्यातुर्जयप्रदाः ।।४७।। प्र.११
(व.सं. अ.-३७ श्लो. ३३ द्वि.पा.३५प्र.पा.)
[२४०]दिग्द्वारभे लग्नगते यात्रार्थविजयप्रदा।
[२४१]लग्ने दिक्प्रतिलोमे सा हानिदा शत्रुभीतिदा।।४७।। प्र.११
(व.सं. अ.-३७ श्लो.-७३)
शत्रोरष्टमलग्ने वा राशौ वापि विलग्नगे[२४२]।
तदीशस्थितलग्ने वा यातुः शत्रुक्षयस्तदा ।।४८।। प्र.११
(व.सं. अ.-३७ श्लो.-२१८)
दिगीश्वरा भास्करशुक्रभौमराह्वर्किचन्द्रज्ञसुरार्चिताः स्युः ।४९। प्र.११
(व.सं. अ.-३७ श्लो.-३८प्र.पादः)
राशीनेके द्वाविनाक्रान्तराशेरप्रादक्षिण्याद्विन्यसेद्दिग्विदिक्षु।
यद्दिग्राशौ लग्नगे सम्मुखत्वं तद्दिग्यातुर्मृत्युदस्तद्दिगीशः।।५१।। प्र.११
(व.सं. अ.-३७ श्लो.-३९)
घ्नन्ति क्रूरास्त्रिषष्ठायभावान्हित्वा परान्सदा ।
पुष्णन्ति सौम्यखचराः षष्ठाष्टान्त्यविना परान् ।।

---

२३९ स्वेष्ट
२४० दिग्द्वारभे लग्नगते तदंशे वा तदीश्वरे।
२४१ अर्थलाभप्रदा यातुरथवा विजयप्रदा।।
२४२ वा यदि लग्नगे

लग्ने षष्ठाष्टमं हन्ति चन्द्रः शुक्रोऽस्तगस्तथा[२४३] ।
मृत्युलग्नस्थितश्चन्द्रो यातुर्मृत्युप्रदः सदा ।।५६।। प्र.११
(व.सं. अ.-३७ श्लो.-१४६,१४७)
उक्त्वा साधारणां यात्रां युद्धयात्रां [२४४]ब्रवीम्यहम्।
व्रजन्ति ये नृपाः सूक्ष्मलग्ने ते यायिनः सदा ।।
योगलग्नेर्युता राज्ञा यात्रा च विजयप्रदा।
विचित्रान्योगलग्नांस्तान्सम्यग्वक्ष्ये समासतः।।५७।। प्र.११
(व.सं. अ.-३७ श्लो.-१४९,१५३)
फलसिद्धिर्धिष्ण्यगुणैरग्रजानां भवेत्सदा ।
योगलग्ने क्षितीशानां चौराणां शकुनैर्भृशम् ।।५७।। प्र.११
(व.सं. अ.-३७ श्लो.-१५०)
प्रयाणसमये यस्य विद्युन्नीहारवृष्टयः ।
अकालजा भवन्त्येते सदा [२४५]भङ्गकरा नृणाम्।।७९।। प्र.११
(व.सं. अ.-३७ श्लो.-४०)
नवमी ज्ञेया त्रिविधा प्रवेशनवमी प्रयाणनवमदिनम्।
निर्गमनतः प्रवेशात् प्रयाणनवमी नवमदिनं च।।
सततं नवमीत्रितयं यात्रायां प्राणहानिदं यातुः।। प्र.११
(व.सं. अ.-३७ श्लो.-४०)
दिगीश्वराकृतिं कृत्वा सुवर्णेन स्वमन्त्रकैः ।।
स्वस्ववर्णैः सुगन्धाद्यैर्दीपैर्धूपैर्मनोरमैः ।
तद्वर्णवस्त्रैर्नैवेद्यैर्भक्त्या सम्यक् प्रपूजयेत् ।।
तद्दिगीशं सुसम्पूज्य तिलहोमं च कारयेत् ।
दैवज्ञाय ततो दद्यात्प्रतिमं दक्षिणान्विताम् ।।
देवान्गुरून्पितृन्विप्रान्स्वस्तिवाचनपूर्वकम् ।
नत्वा तुष्टः प्रीतिमना व्रजेन्मङ्गलनिःस्वनैः ।।८३।। प्र.११
(व.सं. अ.-३७ श्लो.-१२४ द्वि.पादः,१२५,१३४,१३५)

---

२४३ स्तगःसदा
२४४ ब्रवीमि ताम् ।
२४५ भङ्गकरामृशम्

तस्मिन्मुहूर्ते स्वयमप्रमाणे प्रयोजनापेक्षतया च दैवात् ।
तत्रैव तन्निर्गमनं च [२४६]कार्यं स्वीयासनाश्चापि तदुप्यमानम्।।९२।। प्र.११
(व.सं. अ.-३७ श्लो.-१३६)
प्रस्थानं धनुषां पञ्चशतान्युत शतद्वयम् ।
स्वदेवसदनाद्यद्वा दशभिः प्रस्थितो [२४७]गतः।। ९४।। प्र.११
(व.सं. अ.-३७ श्लो.-१४०)
आरभ्य [२४८]निर्गमाद्यावद् दशाहं न वसेन्नृपः।
मण्डलीकः सप्तरात्रात्प्राकृतः पञ्चरात्रतः ।।
अत ऊर्ध्वं व्रजेद्भूयो भद्रे वा दिवसे नृपः ।९५। प्र.११
(व.सं. अ.-३७ श्लो.-१४१,१४२प्र.पादः)
[२४९] यात्राहवे तूत्कटभूषिते च भुक्तोत्कटे रात्रिषु सन्ध्ययोर्वा।
[२५०] क्षौरं प्रकुर्यात्खलु चात्मनो हि श्रेयोऽभिलाषी न कदाचिदेव।।९६।। प्र.११
(व.सं. अ.-१४ श्लो.-६७)
अकाले सततं वृष्टिः सप्ताहं नृपतेर्वधः।।७४।। प्र.११
रक्तवृष्टौ रणोद्योगो मांसवृष्टौ महद्रणम्।
[२५१]मकरश्चास्थिवर्षे स्याद्वसावर्षेऽपि तत्फलम्।
क्षौद्रवर्षे राष्ट्रनाशस्त्वङ्गारैः [२५२]पांशुभिर्गदः।
धान्याकफलपुष्पाद्यैर्लोहैश्चापि [२५३]महद्भयम्।
पर्णैस्तृणैः काष्ठवर्षैस्तदेव फलमादिशेत्।
पाषाणवृष्टिरभ्रेषु प्राणिवृष्टिरथापि वा।।७७।। प्र.११
चित्रवृष्टिर्यदि [२५४]भवेत्सा हि स्यादीतिकारणम्।।७८।।

---

२४६ कार्य्यं स्वात्मासमानं च यदुक्तभानम्
२४७ मतः
२४८ निर्गमाद्यायामातत्क्षितिपो दशवासरान्
२४९ यात्राहवेऽप्युत्कटभूषिते वामुक्तेतरे रात्रिषु सन्ध्ययोश्च ।
२५० क्षौरं न कुर्यात्खलु चात्मनस्च श्रियाभिलाषी न कदाचिदेव ।।
२५१ मरणं स्यादस्थिवृष्टौ वसावृष्टौ हि तत्फलम्।
२५२ पांशुभिः सदा
२५३ स्तेयैर्महद्भयम्

(व.सं. अ.-४५ श्लो.-७४द्वि.पा.,७५,७६,७७,७८)
शाखामृगाख्यभल्लूकदर्शनं [२५५]शब्दितं तथा।
शशसूकरगोपानां यातुः कार्यविनाशनम्।।१०४।।[२५६] प्र.११
(व.सं. अ.-३७ श्लो.-५२)
विगजतुरगभीतान्पुण्यलोकाभिलापी
विरथशिथिलवस्त्रान्मुक्तशस्त्रास्त्रकेशान् ।
[२५७]तृणमुखगतसत्त्वान्प्राञ्जलीन्युद्ध्यमानः[२५८] ।
क्षितिपतिरिति [२५९]वीरान्युद्धभूमौ न हन्यात् ।।
सपत्नदेशान्नगरं प्रविश्य महीपतिर्देवगुरुद्विजार्थे ।
कुर्यान्न वाञ्छा न कुलाङ्गनासु प्राणाभिलाषी न कदाचिदेव ।।१०८।। प्र.११
(व.सं. अ.-३७ श्लो.-२३०, २३१)
नवप्रवेशेऽप्यथ कालशुद्धिर्न द्वन्द्वसौपूर्वकयोः कदाचित् ।
प्रवेशपञ्चाङ्गदिने सुलग्ने वास्त्वर्चनं पूर्ववदत्र कार्य्यम् ।।२।। प्र.११
(व.सं. अ.-३८ श्लो.-२)
चन्द्रजर्य्यसितवासरेषु तु श्रीकरं [२६०]सुतमहार्थलाभदम् ।
सूर्यसूनुदिवसे स्थिरप्रदं किन्तु चौरभयमत्र विद्यते ।।१०९।। प्र.११
(व.सं. अ.-३८ श्लो.-६)
[२६१]त्रिकोणकेन्द्रत्रिधनायसंस्थैः शुभैस्त्रिषष्ठायगतैः खलैश्च ।
लग्नान्त्यषष्ठाष्टमवर्जितेन चन्द्रेण लक्ष्मीनिलयः प्रवेशः ।। ४प्र.११/१३
(व.सं. अ.-३८ श्लो.-१६)
न नैधनेभेऽपि न [२६२]चाष्टलग्ने पञ्चेष्टिकेऽप्यष्टमशुद्धियुक्ते ।

---

२५४ भवेत्सस्यानामीतिकारणम्
२५५ स्वमरिष्टदम्
२५६ एतयोः कीर्तनं यत्र यातुः कार्यविनाशनम्
२५७ नृप
२५८ नुहयमानान्
२५९ तनयादीन्
२६० सुख
२६१ केन्द्रत्रिकोण

कार्यः प्रवेशो न चरांशलग्ने शुभेक्षिते वाप्यऽथ संयुते वा ।।
प्रवेशलग्नान्निधनस्थितो यः क्रूरग्रहः क्रूरगृहे यदि स्यात् ।
प्रवेशकर्त्तारमथ त्रिवर्षाद्धन्त्यष्टवर्षैः शुभराशिगश्चेत् ।।१०९।। प्र.११
(व.सं. अ.-३८ श्लो.-१६,१३.१९)

प्रकरण – १२

वास्तुज्ञानं प्रवक्ष्यामि [२६३]तदुक्तं ब्रह्मणा पुरा ।
ग्रामसप्तपुरादीनां निर्माणं [२६४]वक्ष्यतेऽधुना ।।१पूर्व।। प्र.१२
(व.सं. अ.-३९ श्लो.-१)
विषमाय शुभायैव समायः शोकदुःखदः ।
गृहस्य तत्पतेस्त्वेकधिष्ण्यं च निधनप्रदम् ।।
ध्वजः सिंहे तौ च गजे [२६५]ह्येते गवि शुभप्रदाः ।
वृषो न पूजितोऽन्यत्र ध्वजः सर्वत्र पूजितः ।।५।। प्र.१२
(व.सं. अ.-३९ श्लो.-५१,१७१द्वि.पा.)
गजाये वा ध्वजाये वा गजानां [२६६]सदनं शुभम् ।
अश्वालयं ध्वजाये वा खराये वा वृषेऽपि वा ।।
उष्ट्राणां मन्दिरं कार्यं गजाये वा वृषे ध्वजे ।
पशुसद्म वृषाये वा ध्वजाये वा शुभप्रदम् ।।
शय्यासु वृषभः शस्तः पीठे सिंहः शुभप्रदः ।
[२६७]अमत्रच्छत्रवस्त्राणां [२६८]वृषाये ध्वजेऽपि वा ।।
पादुकौपानहौ कार्य्यौ सिंहायेऽप्यथवा ध्वजे ।

---

२६२ वाष्ट
२६३ यदुक्तं
२६४ सूक्ष्मतोऽधुना
२६५ त्वेते
२६६ मन्दिरं
२६७ अन्यत्र
२६८ वृषभाये

उक्तानामप्यनुक्तानां मन्दिराणां ध्वज: शुभ: ।।५।। प्र.१२
(व.सं. अ.-३९ श्लो.-१८०.१८१.१८२.१८३)
नीचशत्रुगते जीवे शुक्रे वा [२६९]यदि वा बुधे।
[२७०]शशाङ्के वा कृतं गेहमतिनि:स्वत्वमाप्नुयात्।।६।। प्र.१२
(व.सं. अ.-३९ श्लो.-३१)
ध्रुवसंज्ञं गृहं त्वायं धनधान्यसुखप्रदम् ।
[२७१]धान्यं धनप्रदं नऽणां जयं [२७२]स्याद्विजयप्रदम् ।।
नन्दं स्त्रीहानिदं नूनं खरं संपद्विनाशनम् ।
पुत्रपौत्रप्रदं [२७३]कान्तं श्रीप्रदं [२७४]स्यान्मनोरमम् ।।
सुवक्त्रं भोगदं नूनं दुर्मुखं विसुखप्रदम् ।
सर्वदु:खप्रदं क्रूरं विपक्षं शत्रुभीतिदम् ।।
धनदं धनदं गेहं क्षयं सर्वक्षयप्रदम् ।
आक्रन्दं शोकजननं विपुलं श्रीयश:प्रदम्।
[२७५]विपुलं नामसदृशं धनदं विजयाभिधम्।।१०।। प्र.१२
(व.सं. अ.-३९ श्लो.-१००,१०१,१०२,१०३)
त्रिषु त्रिषु च मासेषु नभस्यादिषु च क्रमात् ।।
यद्दिङ्मुखो [२७६]वास्तुनरस्तन्मुखं सदनं शुभम् ।
[२७७]अन्यदिङ्मुखगेहं तद् दु:खशोकभयावहम् ।।११।। प्र.१२
(व.सं. अ.-३९ श्लो.-५९द्वि.पा.,६०)
ऐश्वर्यं पुत्रहानिश्च [२७८]स्त्रीनाशो निधनं भवेत् ।

---

२६९ ज्ञेऽथवा रवौ ।
२७० निर्मितं सदनं शश्वदतिनिस्वत्वतां गतम्
२७१ धनधान्यप्रदं
२७२ तद्विजय
२७३ कान्तिं
२७४ यन्मनोरमम्
२७५ विजयं नामसदनं धनदं विजयप्रदम्
२७६ वास्तुपुरुष: सदनं
२७७ अन्यदिग्वक्त्रगेहं तु

संपच्छत्रुभयं सौख्यं पुष्टि: [२७९]प्रागादित: क्रमात् ।।२०।। प्र.१२
(व.सं. अ.-३९ श्लो.-१८९)
ऐन्द्र्यां दिशि स्नानगेहमाग्नेय्यां पचनालयम् ।
याम्यायां शयनं वेश्म नैर्ऋत्यां शस्त्रमन्दिरम् ।।
वारुण्यां भोजनगृहं वायव्यां [२८०]धान्यमन्दिरम्।
उदीच्यां हाटकं सद्म ऐशान्यां देवमन्दिरम् ।।२१।। प्र.१२
(व.सं. पेज-४१२ अ.-३९ श्लो.-१६४,१६५)
[२८१]इन्द्राग्न्योर्मथनं मध्ये याम्याग्न्यो [२८२]धूर्तमन्दिरम् ।
[२८३]यमराक्षसयोर्मध्ये पुरीशत्यागमन्दिरम् ।।
राक्षसाम्बुपयोर्मध्ये [२८४]विद्याभ्यासस्य मन्दिरम् ।
तोयेशानिलयोर्मध्ये सदनं [२८५]रौदनं स्मृतम्।।
[२८६]वायव्योत्तरयोर्मध्ये सम्भोगस्यैव मन्दिरम्।
[२८७]उत्तरेशानयोर्मध्ये त्वौषधागारमुच्यते।।
पुरन्दरेशानयोर्मध्ये सर्ववस्तुसंग्रहम् ।
सदनं कारयेदेवं क्रमादुक्तानि षोडश ।।२१।। प्र.१२
(व.सं. अ.-३९ श्लो.-१६७,१६८,१६९,१७०)
एको [२८८]ग्रहश्चेत्परभागवर्ती जायागत:[२८९] कर्मगतोऽथ वा स्यात् ।
[२९०]करोति गेहं परहस्तयातं करोति वर्षाद्विबल: स खेट: ।।२५।। प्र.१२

---

२७८ स्त्रीहानिर्निधन
२७९ प्राच्यादित:
२८० पशुमन्दिरम्
२८१ ऐन्द्र
२८२ रतिमन्दिरम्
२८३ याम्य
२८४ विद्याभवनभ्यासस्य
२८५ रोदनं तत:
२८६ कामोपभोगसदनं वायुकौबेरमध्ययो: ।
२८७ कौबेरशानयोर्मध्ये चिकित्सासदनं सदा ।।
२८८ ग्रहेन्द्र:
२८९ स्थित:

(व.सं. अ.-३८ श्लो.-२१)
इज्योत्तरात्रयाहीन्दुविष्णुधातृजलोडुषु ।
गुरुणा सहितेष्वेषु कृतं गेहं श्रिया युतम् ।।२५।। प्र.१२
(व.सं. अ.-३९ श्लो.-३२)
[२९१]द्विदैवत्वाष्ट्रवारेंऽशरुद्रादितिवसूडुषु ।
शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहम् ।।२६।। प्र.१२
(व.सं. अ.-३९ श्लो.-३३)
पितृमूलेज्यभाग्यार्कपौष्णभेषु च यत्कृतम्।
कुजेन सहितेष्वेव गृहं [२९२]सन्दह्यतेऽग्निना ।।२७।। प्र.१२
(व.सं. अ.-३९ श्लो.-२७)
अग्निनक्षत्रगे सूर्य्ये चन्द्रे वा संस्थिते यदि ।
निर्मितं मन्दिरं नूनमग्निना दह्यते ऽचिरात् ।।२७।। प्र.१२
(व.सं. अ.-३९ श्लो.-२८)
अजपादद्वितीये याम्यमित्रेन्द्रानिलभेषु च ।
यत्कृतं शनिसंयुक्ते [२९३]दह्यते यक्षराक्षसैः ।।२८।। प्र.१२
(व.सं. अ.-३९ श्लो.-२९)

## प्रकरण - १३

अथ प्रवेशो नवसद्मनश्च सौम्यायने जीवसिते बलाढ्ये ।
सिते च पक्षे शुभवासरे च वास्त्वर्चनं भूतबलिं च कृत्वा ।।१।। प्र.१३
(व.सं. अ.-३८ श्लो.-१)
माघेऽर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च ।
चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे पशुपुत्रलाभः ।।

---

२९० प्रविष्टगेहं
२९१ वारीश
२९२ तद्दह्यते
२९३ संयुक्तं गृह्यते

[२९४]ज्येष्ठे च मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च ।
शुक्ले च पक्षे सुतरां [२९५]विवृद्ध्यै कृष्णे च यावद्दशमी च तावत् ।।१।। प्र.१३
(व.सं. अ.-३८ श्लो.-८, ९)
मृगादिषड्राशिषु संस्थितेऽर्के नवप्रवेशः शुभदः सदैव ।
कुम्भं विनान्येष्वपि केचिदूचुर्न सौरमिष्टं खलु सन्निवेशे ।।१।। प्र.१३
(व.सं. अ.-३८ श्लो.-१८)
अर्कानिलार्यादितिदस्रविष्णुऋक्षे प्रविष्टं नवमन्दिरं यत् ।
अब्दत्रयात्तत्परहस्तयातं शेषेषु धिष्ण्येषु च मृत्युदं स्यात् ।।१।। प्र.१३
(व.सं. अ.-३८ श्लो.-११)
कर्तुर्विलग्नादथ[२९६] जन्मराशेर्लग्नस्थितो राशिरिति प्रदिष्टः ।
निर्व्याधिदारिद्र्ययशस्करश्च सुहृत्सुतघ्नो रिपुनाशदः सः ।।१४।। प्र.१३
कलत्रहन्ता निधनप्रदश्च रोगप्रदः सिद्धिकरोऽर्थदश्च ।
क्रमाच्च [२९७]वैरामयदः क्रमेण सदैव नूनं त्रिविधः [२९८]प्रवेशः।।१।।
(व.सं. अ.-३८ श्लो.-१४,१५)
अपूर्वसंज्ञः प्रथमप्रवेशो यात्रावसाने च सुपूर्वसंज्ञः ।
[२९९]द्वन्द्वाभयस्त्वग्निभयादिजातस्त्वेवं प्रवेशस्त्रिविधः प्रदिष्टः ।।२।। प्र.१३
(व.सं. अ.-३८ श्लो.-३)
क्रूरग्रहाधिष्ठितविद्धभं च विवर्ज्जनीयं त्रिविधप्रवेशे ।।२।। प्र.१३
(व.सं. अ.-३८ श्लो.-७द्वि.पादः)
निर्माणे मन्दिराणां च प्रवेशे त्रिविधेऽपि [३००]वा ।।
वास्तुपूजा [३०१]तु कर्त्तव्या यस्मात्तां कथयाम्यथ।।

---

२९४ ज्येष्ठेषु
२९५ प्रवृद्धये
२९६ लगनाच्च हि
२९७ वैरीभयद प्रवेशेः
२९८ विचन्त्यम
२९९ द्वन्द्वाह्वय
३०० च
३०१ च कर्तव्या तस्मात्तां कथयाम्यथ

गृहमध्ये हस्तमात्रं समन्तात्तण्डुलोपरि ।।
एकाशीतिपदं कार्यं तिलैस्तुल्यं सुशोभनम् ।
एकद्वित्रिपदाः पञ्चचत्वारिंशत्सुरार्चिताः ।।
द्वात्रिंशद्वाह्यतो वक्ष्यमाणाश्चान्तस्त्रयोदश ।
तेषां स्थानानि नामानि वक्ष्यामीश्वरकोणतः ।।
तत्राग्निशम्भुकोणस्थस्त्वसौ [302]चैकपदेश्वरः ।
तस्माद्वितीयः पर्जन्यश्चासावेकपदेश्वरः ।।
जयन्त्येन्द्रार्कसत्याख्या भृशाश्च द्विपदेश्वराः ।
आकाशवायुपरतः क्रमादेकपदेश्वराः ।।
एवं प्राच्यां नव ज्ञात्वा [303]त्वेवमेवान्यदिक्षु च।
आद्यश्चान्तावेकपादा द्विपादाः पञ्च मध्यमाः ।
पूषाद्यष्टौ यमान्ताः स्युरमरा याम्यभागगाः ।।
आद्यश्चान्तावेकपादा द्विपादाः पञ्च मध्यमाः ।
अष्टौ पितृगणाधीशा [304]पापान्ताः [305]पश्चिमेश्वराः।
आद्यन्तौ द्वौ चैकपदौ द्विपदाः पञ्च मध्यगाः ।।
रोगादिरित्यन्तसुराः सप्त सौम्यदिशि क्रमात् ।
[306]तत्राधःस्थश्चतुष्कोणेष्वीशानादिषु च क्रमात् ।।
आपः सावित्रविजयरुद्राश्चैकपदेश्वराः ।
मध्ये नवपदो ब्रह्मा तस्येशानादिकोणगाः ।।
आपवत्सोऽथ सविता विबुधाधिपसंज्ञकाः ।
राजयक्ष्मा च चत्वारः सुराश्चैकपदेश्वराः ।।
ब्रह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अमी ।
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात् ।।
स्वस्वस्थलेषु [307]देवेषु स्थापितेष्वीदृशं भवेत् ।

---

३०२ चैव
३०३ नवमे वान्यदिक्षु
३०४ यमान्ताः
३०५ पश्चिमे सुराः
३०६ तदधस्थ

कोणेषु पञ्चमे चैव चतुर्थैकपदाः सुराः ।।
प्रागादिदिक्षु द्विपदाः पञ्च पञ्च यथाक्रमम्[308] ।
ब्रह्मणः पूर्वतो दिक्षु [309]त्रिपदाः स्युः समीपगाः ।।
हिरण्यरेताः पर्जन्यो जयन्तः पाकशासनः ।
सूर्यसत्यौ भृशाकाशौ वायुः पूषा च वैतथा ।।
गृहक्षतः पितृपतिर्गन्धर्वो [310]भृंगराजकः ।
मृगः पितृगणाधीशस्तथा [311]दौवारिवाह्वयः ।।
सुग्रीवः पुष्पदन्तश्च जलाधीशो निशाचरः ।
शोषः पापश्च रोगो हि मुखो भल्लाट एव च ।।
सोमसर्पौ दित्यदिती द्वात्रिंशदमराः स्मृताः ।
आपश्चैवापवत्सश्च जयो रन्ध्रस्तथैव च ।।
मध्ये नवपदो ब्रह्मा तस्थौ तस्य समीपगः ।
[312]प्राच्यां ह्यन्तरिता देवाः परितो ब्रह्मणः स्मृताः ।।
अर्यमा सविता चैव विवस्वान्विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।।
आपवत्सोऽष्टमः पञ्चचत्वारिंशत्सुरोत्तमाः ।
ज्ञात्वैवं स्थाननामानि ब्रह्मणा सहितान् न्यसेत् ।।
वास्तुज्ञो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः ।
प्रणवेनार्चयेद्वापि अथवा स्वस्वनामभिः ।।
शुक्लवस्त्रयुगं दद्याद्धूपदीपफलैः सह ।
अपूपैर्भूरिनैवेद्यैर्वाद्यैः सह समर्पयेत् ।।
ताम्बूलं च ततो दद्याद्देवेभ्यश्च पृथक्पृथक् ।
दत्त्वा पुष्पाञ्जलिं कर्ता प्रार्थयेद्वास्तुपूरुषम् ।।

---

३०७ स्थानेषु
३०८ क्रमात्
३०९ द्विपदा
३१० मृगराजकः :
३११ स्थाप्यो
३१२ प्रागाद्यन्तरिता

नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो ।।
मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा ।
इति प्रार्थ्य ततो दद्याद्दक्षिणामर्चकाय च ।।
विप्रेभ्यो भोजनं दत्त्वा स्वयं भुञ्जीत बन्धुभिः ।
एवं यः कुरुते सम्यग्वास्तुपूजां प्रयत्नतः ।
आरोग्यं पुत्रपौत्रादो धनधान्यं लभेन्नरः ।।
वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे ।
रोगान्नानाविधान्क्लेशानश्नुते सर्वसंकटान् ।।२।।
(व.सं. अ.-३८ श्लो.-१९५ तः २२२)
पञ्चाङ्गसंशुद्धिदिने निशीशताराबले चाष्टकवर्गयुक्ते ।
सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेऽथवा द्व्यङ्गगृहे विलग्ने ।।४।। प्र.१३
(व.सं. अ.-३८ श्लो.-१२)
यः क्षीणचन्द्रोन्त्यषडष्टसंस्थः पापेक्षितः पापयुतोऽथवा स्यात् ।
कर्तुः स्त्रियं हन्ति स वत्सरेण त्रिवर्षतः सौम्यनिरीक्षितश्चेत् ।।४।। प्र.१३
(व.सं. अ.-३८ श्लो.-२०)
कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान्पूज्यानग्रतः पूर्णकुम्भम् ।
हर्म्यं रम्यं तोरणैः स्रग्वितानैः स्त्रीभिः[३१३] स्रग्वी गीतमाल्यैर्विशेत् तत्।।४/७।। प्र.१३
(व.सं. अ.-३८ श्लो.-२०)

## मुहूर्तचिन्तामणिग्रन्थ उद्धृतवसिष्ठश्लोकानां सूचिः-
## (किन्तु वसिष्ठसंहिताग्रन्थ एते श्लोका नोपलभ्यन्ते।)

शुभकार्यप्रसूते च सर्वदा परिवर्जयेत्।।९।। प्र.१
सूर्याच्चतुर्थे दशमे च षष्ठे

---

३१३ सम्यक् गीतवाद्यैर्विशेत्

विश्वर्क्षके विंशतिमे नवर्क्षे।
भवन्ति षड्भानुमहर्क्षयोगाः
कुयोगविध्वंसकराः शुभेषु।। २७।। प्र.१
सर्वग्रासे दिनान्यष्टौ सर्वकार्येषु वर्जयेत्।
षट् दिनानि त्रिभागोने अर्धग्रासे चतुर्दिनम्।।
चतुर्थांशे त्रिरात्रं स्याद् ग्रहणे चन्द्रसूर्ययोः।।३२।। प्र.१
नक्षत्रे यस्य दर्शान्तौ विषनाड्यां भवेद्यदि।
कुहूयोग इति ख्यातो व्याधिमृत्युभयादिकृत्।।५७।। प्र.२
भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तटे।
विवाहो व्रतबन्धो वा सिंहस्थे ज्ये न दुष्यति।। ४९।। प्र.१
नीचराशिगतः स्वस्य शत्रुक्षेत्रगतोऽपि वा।
शुभाशुभफलनैव दद्यादस्तङ्गतोऽपि वा।।५।। प्र.४
तिमिरमिव कठोरज्योतिरुत्पत्तिकाले
क्षयमथ समुपैति प्राप्नुयादीप्सितानि।।१ ।। प्र.५
वृषमिथुनकर्कसिंहकन्या
तुलाधरचापझषाः शुभा भवन्ति।
यदि शुभफलशालिनोऽनुकूला
निधनविशुद्धियुता निषेककाले।।७।। प्र.५
केन्द्राग्नि त्रिकोणेषु शुभस्थितेषु
लग्ने शशाङ्के च शुभैः समेते।
पापैस्त्रिलाभारिगतैश्च याया-
त्पुञ्जन्मयोगेषु च सम्प्रयोगम्।।७।। प्र.५
अष्टमस्था ग्रहाः सर्वे नेष्टाः स्युस्ते शुभावहाः।
एवं सम्यक्परीक्ष्यैव कुर्यात्पुंसवानक्रियाम्।।१०। प्र.५
उदग्गते भास्वति पञ्चमेऽब्दे
प्राप्तेऽक्षरस्वीकरणं शिशूनाम्।
सरस्वती विघ्नविनायकं च
गुडौदनाद्यैरभिपूज्य कुर्यात्।।३७।। प्र.५
निहितं त्रिविधोत्पातैः क्रूराक्रान्तं च विद्धभं त्वखिलम्।

त्याज्यं तच्छुभकर्मणि न पादतः पातधिष्ण्यं च।।४०।। प्र.५
सर्वे ग्रहाश्चाष्टमगा निधनाः धनशोकदाः।
विना स्वतुङ्गस्वर्क्षाधिमित्रगाः शुभवर्गगाः।।
आचार्यमशुभा घ्नन्ति शिष्यं घ्नन्त्यशुभेतराः।। प्र.५
बन्धौ तृतीये रिपुराशिसंस्थे वाञ्छन्ति पूजां दशमे सुरेज्ये।
नेच्छन्ति पूजा जनिगे व्ययस्थे पुरातना अष्टमगेऽपि राशौ।।४६।। प्र.५
ग्रहे रवीन्द्वोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे।
व्रते दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित्।।५३।। प्र.५
प्रष्टुर्विलग्नात्प्रबलः शशाङ्कः शत्रुस्थितो मृत्युग्रहस्थितो वा।
यद्यष्टमाब्दात्परतो विवाहं करोति मृत्युं वरकन्ययोश्च।।४।। प्र.६
रजो हि द्रष्टं यदि कन्यकायाः कुलद्वयं दुर्गतिमेति तस्याः।
तस्मान्नितान्तं च तदुक्तकालं नोल्लङ्घ्य पाणिग्रहणं विधेयम्।।११।। प्र.६
एकोदरप्रसूतानां नात्र कार्यत्रयं भवेत्।
भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीत्।।१६।। प्र.६
द्विशोभनं त्वेकगृहेऽपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैश्च।
आवश्यकं शोभनमुत्सुको वा द्वारेऽथ वाचार्यविभेदतोऽपि।।१६।। प्र.६
द्विर्द्वादशे वा नवपञ्चमे वा षष्ठाष्टके राक्षसयोषितो वा।
एकाधिपत्ये भवनेशमैत्रे शुभाय पाणिग्रहणं विधेयम्।।३२।। प्र.६
एकगृहसम्भवानां भवति विवाहसुतार्थसम्पत्त्यै।
यद्युभयोरेकर्क्षं भवति तदा चांशको भिन्नः।।३५।।
यः पापषड्वर्गभवो हि दोषः
पञ्चाङ्गसौम्यग्रहलग्नजातम्।
गुणौघमम्भोधिममोघबाणः
शुष्यत्यदोषं खलु राघवस्य।। प्र.६
मेषादिरन्धकं षट्कं चत्वारो बधिराः स्मृताः।
द्वौ पङ्गुवेति विज्ञेयावित्येतद्राशिलक्षणम्।।
मेषो वृषो मृगेन्द्रश्च दिवसेऽन्धाः प्रकीर्तिताः।
नृयुक्कर्कटकन्याश्च रात्रावन्धाः प्रकीर्तिताः।
तुला च वृश्चिकश्चैव दिवसे बधिरौ तथा।

धनुश्च मकरश्चैव बधिरौ निशि कीर्तितौ।।
कुम्भमीनौ च पङ्गुद्वौ दिवारात्रौ यथाक्रमम्। ८१। प्र.६
वर्गोत्तमं विनान्त्यांशो विवाहे न शुभप्रदः।
वर्गोत्तमश्चेदन्त्यांशः पुत्रपौत्रादिवृद्धिदः।।८५।। प्र.६
क्रूरैर्विद्धो युतो वापि पुष्यो यदि बलान्वितः।
विना पाणिग्रहं सर्वं मङ्गलेष्विष्टदः सदा।।३८।। प्र.११
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा।
विजयादशमी तत्र सर्वकार्येष्वनिन्दिता।
यात्रायां जयदा राज्ञां सन्धिं वापि प्रयच्छति।।७७।। प्र.११
अथातः सम्प्रवक्ष्यामि सूतिकागारवेशनम्।
मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने।।
प्रसूतिसम्भवे काले सद्म एव प्रवेशयेत्।।१५।। प्र.१२
सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेऽथवा द्व्यङ्गगृहे विलग्ने।।१।। प्र.१३
यस्मिन्दर्शस्यान्तादर्वागेका परा परं दर्शम्।
उल्लङ्घ्य भवति भानोः संक्रान्तिः सोऽधिमासः स्यात्।।
आद्यन्तदर्शयोर्मध्ये तयोराद्यन्तयोर्यदा ।
संक्रान्तिद्वितयं स्याच्चेन्न्यूनमासः स उच्यते।।
मासप्रधानाखिलमेव कर्म मुक्त्वाखिलं कर्म न कार्यमत्र।
यज्ञोपवासव्रततीर्थयात्राविवाहकर्मादि विनाशमेति।।३५/२०।। प्र.१/३
सौम्येक्षितेऽनिष्टफलः शुभदः पापवीक्षितः।
निष्फलौ तौ ग्रहे स्वेन शत्रुणा चावलोकितः।

## पीयूषधाराटीकायां प्रयोगपारिजाततः उद्धृता वसिष्ठश्लोकाः

मास्यष्टमे च गर्भस्य कुर्याद्विष्णुबलिक्रियाम्।
श्रवणे चैव रोहिण्यां पुष्ये चैव प्रशस्यते।।
द्वितीया सप्तमी चैव द्वादशी च शुभा तिथिः।
शुभग्रहोदयाः शस्तास्तेषां च दिवसा अपि ।
पापास्त्र्यायारिगाः श्रेष्ठा नेष्टाः सर्वेऽष्टमे स्थिताः।।१०।।(मु.चि. प्र.५ श्लो. १० टीका)

## ३.४.२ बृहत्संहिताग्रन्थ उद्धुतवसिष्ठश्लोकानां सूचिः - ( किन्तु वसिष्ठसंहिताग्रन्थे एते श्लोका नोपलभ्यन्ते।)

भषट्कान्तरितौ राहुः सूर्याचन्द्रमसावुभौ ।
छाद्यत्युरगाकारो वरदानात्स्वयंभुवः।।अ.५ श्लो.३ टीका
चतुरङ्गुलं वसिष्ठः कथयति नेत्रान्तकर्णयोर्विवरम्।
अधराङ्गुलप्रमाणस्तस्यार्धेनोत्तराष्टश्च।।८।। अ.५८ श्लो.८
सविद्युतः सपृषतः सपांशूत्करमारुताः।
सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः।।४।। अ.२२ श्लो.४
यदा तु विद्युतः श्रेष्ठाः शुभांशाः प्रत्युपस्थिताः।
तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः।।५।। अ.२२ श्लो.५
सपांशुवर्षा सापश्च शुभा बालक्रिया अपि।
पक्षिणां सुस्वरा वाचः क्रीडा पांशुजलादिषु।।६।। अ.२२ श्लो.६
रविचन्द्रपरिवेषाः स्निग्धा नात्यन्तदूषिताः।
वृष्टिस्तदापि विज्ञेया सर्वसस्यार्घसाधिका।।७।। अ.२२ श्लो.७
मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः।
तदा स्यान्महती वृष्टिः सर्वसस्याभिवृद्धये।।८।। अ.२२ श्लो.८
यदा तु बलवान्वायुरन्तरिक्षानिलाहतः।
पतत्याशु स निर्घातो भवेदनिलसम्भवः।।
तस्य योगान्निपततश्चलत्यन्याहता क्षितिः।
सोऽभिघातसमुत्थः स्यात्सनिर्घातमहीचलः।। अ.३२ श्लो.२

## ३.४.३ बृहत्संहिताग्रन्थस्य भट्टोत्पलविवृत्तिसमन्वितविमला हिन्दीव्याख्यायुत (पूर्वार्द्ध)ग्रन्थ उद्धृतवसिष्ठश्लोकानां सूचिः - (किन्तु वसिष्ठसंहिताग्रन्थे एते श्लोका नोपलभ्यन्ते।)

जगदण्डखमध्यस्था महाभूतमयी क्षितिः।
भावायुसर्वसत्त्वानां वृत्तगोल इव स्थिता।।१२ टीका।। अ.२
मुखपुच्छविभक्ताङ्गभुजङ्गाकार-
भषट्कान्तरितौ राहुः सूर्याचन्द्रमसावुभौ।
छादयत्युरगाकारो वरदानात्स्वयम्भुवः।।५ टीका।। अ.५
केचिद्वदन्ति कार्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युः।
न च तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये।।५ टीका।। अ. २१
यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय।
तस्करभयदाश्चोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः।।३।। अ.२२
सविद्युतः सपृषतः सपांशूत्करमारुताः।
सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः।।४।। अ.२२ श्लो.४
यदा तु विद्युतः श्रेष्ठाः शुभांशाः प्रत्युपस्थिताः।
तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः।।५।। अ.२२ श्लो.५
सपांशुवर्षा सापश्च शुभा बालक्रिया अपि।
पक्षिणां सुस्वरा वाचः क्रीडा पांशुजलादिषु।।६।। अ.२२ श्लो.६
रविचन्द्रपरिवेषाः स्निग्धा नात्यन्तदूषिताः।
वृष्टिस्तदापि विज्ञेया सर्वसस्यार्घसाधिका।।७।। अ.२२ श्लो.७
मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः।
तदा स्यान्महती वृष्टिः सर्वसस्याभिवृद्धये।।८।। अ.२२ श्लो.८
यदा तु बलवान्वायुरन्तरिक्षानिलाहतः।
पतत्याशु स निर्घातो भवेदनिलसम्भवः।।
तस्य योगान्निपततश्चलत्यन्याहता क्षितिः।
सोऽभिघातसमुत्थः स्यात्सनिर्घातमहीचलः।।२ टीका।। अ.३२

उत्तरार्द्धे-

(किन्तु वसिष्ठसंहिताग्रन्थे नोपलभ्यन्ते।)

वसिष्ठमुनिर्नेत्रान्तकर्णयोर्विवरमन्तरं चतुरङ्गुलं कथयति।।८ टीका।। अ. ५८
तथा च वसिष्ठः।
कर्णनेत्रान्तरं यच्च तद्विद्यात् चतुरङ्गुलम्।

## ३.४.४ वास्तुरत्नाकरग्रन्थ उद्धृतवसिष्ठश्लोकानां सूचिः-

अकारादिषु वर्गेषु [३१४]दिक्षु पूर्वादितः क्रमात्।
गृध्रमार्जारसिंहाश्वसर्पाखुमृगशाशकाः।।२४।।वास्तुरत्नाकरः अ.१
(व.सं. अ. ३९ श्लो. ४३)
दिग्वर्गाणामिव्यं[३१५] योनिः स्ववर्गात्पञ्चमो रिपुः।
रिपुवर्गं परित्यज्य शेषवर्गाः शुभप्रदाः।।२५।। वास्तुरत्नाकरः अ.१
(व.सं. अ. ३९ श्लो. ४४)
साध्यवर्गं पुरः स्थाप्यं पृष्ठतः साधकं[३१६] न्यसेत्।
विभजेदष्टभिः शेषं साधकस्य घनं [३१७]भवेत्।।२६।। वास्तुरत्नाकरः अ.१
(व.सं. अ. ३९ श्लो. ४५)
व्यत्ययेनागतं शेषं साधकस्य ऋणं [३१८]भवेत्।
घनाधिकं स्वल्पमृणं सर्वसम्पत्प्रदं [३१९]नृणाम्।।२७।। वास्तुरत्नाकरः अ.१

---

३१४ दिक्ष्वष्टसु यथाक्रमम्।
३१५ मियं
३१६ साधकस्य च।
३१७ स्मृतम्।
३१८ स्मृतम्।
३१९ स्मृतम्।

(व.सं. अ. ३९ श्लो. ४६)
मासे तपस्ये तपसि माधवे नभसि त्विषे।
ऊर्जे च गृहनिर्माणं पुत्रपौत्र-[320]धनप्रदम्।।१४।। वास्तुरत्नाकर: अ.९
(व.सं. अ. ३९ श्लो. ४१)
नवप्रवेशे [321]त्वथ कालशुद्धिर्न द्वन्द्वसौपूर्वकयो: कदाचित्।
प्रवेशपञ्चाङ्गदिनेषु लग्ने वास्त्वर्चनं पूर्ववदेव कार्यम्[322]।।११।। वास्तुरत्नाकर: अ. १०
(व.सं. अ. ३८ श्लो. २)

## ३.४.५ वास्तुरत्नावलीग्रन्थ उद्धृतवसिष्ठश्लोकानां सूचि: -

नीचे शत्रुगते जीवे शुक्रे [323]चन्द्रेऽथवा रवौ।
[324]निमित्तं सदनं शश्वदतिनि[325]:स्वत्वमाप्नुयात्।।अ. ९
(व.सं. अ. ३९ श्लो. ३१)
ऐश्वर्यं पुत्रहानिश्च स्त्रीनाशो[326] निधनं भवेत्।
सम्पच्छत्रुभयं सौख्यं पुष्टि: [327]प्रागादित: क्रमात्।।अ.९
(व.सं. अ. ३९ श्लो. १८९)
ऐन्द्र्यां [328]स्नानगृहं कार्यमाग्नेय्यां पचनालय:।
याम्यायां शयनं वेश्म नैर्ऋत्यां शस्त्रमन्दिरम्।।अ.९

---

३२० प्रवर्द्धनम्
३२१ ऽप्यथ
३२२ प्रवेशपञ्चाङ्गदिने सुलग्ने वास्त्वर्चनं पूर्ववदत्र कार्य्यम्।।
३२३ न्द्रेऽथवा रवौ
३२४ निर्मितं
३२५ निस्वत्वतां गतम्।।
३२६ हानि
३२७ प्राच्यादित:
३२८ स्नानगेह

(व.सं. अ. ३९ श्लो. १६४)
वारुण्यां भोजनगृहं वायव्यां [३२९]धान्यमन्दिरम्।
उदीच्यां हाटकं सद्म ऐशान्यां देवमन्दिरम्।।अ.९
(व.सं. अ. ३९ श्लो. १६५)
[३३०]इद्राग्न्योर्मथनं गेहं याम्याग्न्योर्घृतमन्दिरम्[३३१]
यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम्।
(व.सं. अ. ३९ श्लो. १६७)
तोयेशानिलयोर्मध्ये [३३२]रोदनं मन्दिरं स्मृतम्।।अ.९
(व.सं. अ. ३९ श्लो. १६८ द्वि.पाद:)
वायव्योत्तरयोर्मध्ये सम्भोगस्यैव मन्दिरम्।[३३३]
उत्तरेशानयोर्मध्ये त्वौषधागारमुच्यते।।[३३४]
(व.सं. अ. ३९ श्लो. १६७)
सदनं कारयेदेवं क्रमादुक्तानि षोडश।।इति।।अ.९
(व.सं. अ. ३९ श्लो. १७० द्वि.पाद:)
[३३५]इज्योत्तरात्रयाहीन्दुविष्णुधातृजलोडुषु।
गुरुणा सहिते [३३६]धिष्ण्ये कृतं गेहं [३३७]श्रियान्वितम्।।अ. ९
(व.सं. अ. ३९ श्लो. ३२)
हस्तार्यमात्वाष्ट्रदस्रचतुरास्योडुभेषु[३३८] च।
सबुधे बुधवारे तु धनपुत्रसुखप्रदम्।।[३३९] अ.९

---

३२९ पशुमन्दिरम्
३३० एंद्रा
३३१ वतिमन्दिरम्।
३३२ शदनं रोदनं तत:।
३३३ कामोपभोगसदनं वायुकौबरमध्ययो:।
३३४ कौबेरशानयोर्मध्ये चिकित्सासदनं सदा।।
३३५ इज्यो
३३६ सहितेष्वेषु
३३७ श्रियायुम्
३३८ हस्तार्यमभत्वाष्ट्रदस्रचतुरास्येन्दुभेषु

(व.सं. अ. ३९ श्लो. ३४)
अजपाद[३४०]द्वितये याम्यमित्रेन्द्रानिलभेषु च।
समन्दे मन्दवारे च गृह्यते यक्षराक्षसैः।।[३४१]
(व.सं. अ. ३९ श्लो. २९)
अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने च [३४२]स्वपूर्वसंज्ञः।
[३४३]द्वन्द्वामयश्चाग्निभयादिजातस्त्वेवं प्रवेशस्त्रिविधः प्रदिष्टः।।अ.१०
(व.सं. अ. ३८ श्लो. ३)
कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान्पूज्यानग्रतः पूर्णकुम्भम्।
रम्यं हर्म्यं तोरणस्रग्वितानैः सम्यक् स्त्रीभिर्गीतवाद्यैर्विशेत्तत्।।[३४४]अ. १०
(व.सं. अ. ३८ श्लो. २४)
राशिकूटादिकं सर्वं दम्पत्योरिव चिन्तयेदिति।अ.१०
(व.सं. अ. ३९ श्लो. ५४)

**वास्तुरत्नावलीग्रन्थ उद्धुतवसिष्ठश्लोकानां सूचिः -**

(किन्तु वसिष्ठसंहिताग्रन्थ एते श्लोका नोपलभ्यन्ते।)

श्वेता शस्ता द्विजेन्द्राणां रक्ता भूमिर्महीभुजाम्।
विशां पीता च शूद्राणां कृष्णान्येषां विमिश्रिता।। अ. १
विस्तीर्णं समभागश्च संस्थितं परिकीर्तितम्।
चतुरस्रं चतुष्कोणं समभागं विभागतः।।
वृत्तमेतत् समाख्यातं वास्तुलक्षणकोविदैः।

---

३३९ बुधेन सहितेष्वेषु धनपुत्रसुखप्रदम्।।
३४० द शब्दस्य लोपः
३४१ यत्कृतं शनिसंयुक्तं गृह्यते यक्षराक्षसैः।।
३४२ सुपूर्व
३४३ द्वन्द्वाह्वयस्त्वग्निभयादिजातस्तवेवं
३४४ हर्म्यं रम्यं तोरणैः स्रग्वितानैः स्त्रीभिः सम्यक् गीतवाद्यैविशेत्तत्।।

चतुर्भिर्विभजेत् कोणैस्तद्वास्तुवृत्तमुच्यते।।
आयतं चतुरस्रं च मध्यकोष्ठे भवेत् फलम्।
यदि वर्तुलपीताभं स्थानं भद्रासनं विदुः।।
चक्रवक्रसमाकारे विजयं निम्नतोन्नतम्।
निम्नता चापकृष्टा च शक्रचापस्य कीर्तिता।।
त्रिकोणं शकटाकारं तद्वास्तुकृदिहोच्यते।
दीर्घदण्डमिति ख्यातं पवनं पवनात्मकम्।।
मुरजं मुरजाकारं बृहन्मध्यं प्रकीर्तितम्।
अश्वत्थपर्णवत् कुम्भो धनुःकोणाकृतिर्धनुः।।
शूर्प शूर्पनिभं ज्ञेयं गृहं गणितकोविदैः। अ. १

## ३.४.६ वास्तुसौख्यग्रन्थ उद्धुतवसिष्ठश्लोकानां सूचिः -

[३४५]केशास्थिकीटशुद्ध्यर्थं पुरुषत्रयमानतः।
खनित्वा पूरयेत्तत्र पाषाणैः[३४६] सिकताम्बुभिः।।८३।।अ. ४
(व.सं. अ. ३९ श्लो. ८)
एवं परीक्षितं क्षेत्रं [३४७]चादौ दिक्साधनं ततः।८४ अ.४
(व.सं. अ. ३९ श्लो. ९ प्र.पादः)
वास्तुज्ञानं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा।
ग्रामसद्म[३४८]पुरादीनां निर्माणं सूक्ष्मतोऽधुना।।६।। भागः १
(व.सं. अ. ३९ श्लो. १)
षड्वर्गशुद्धिसूत्रेण सूत्रिते धरणीतले।
सूत्रिते समये तस्मिन्सूत्रं केनापि लङ्घितम्।।५६।।भागः ३
(व.सं. अ. ३९ श्लो. ७३ द्वि.पादः, श्लो. ७४ प्र.पादः)

---

३४५ कीलकेशास्थि
३४६ पाषाण
३४७ कृत्वा
३४८ सप्त

तदास्थि [३४९]तद्विजानीयात्पुरुषस्य प्रमाणतः।
अभ्यक्तो दृश्यते यस्यां दिशि शल्यं समादिशेत्।।५७।। भागः ३
(व.सं. अ. ३९ श्लो. ७४ द्वि.पादः, श्लो. ७५ चतुर्थपादः)
तस्यामेव तदास्थीनि सप्तत्यंगुलमानतः।
सूत्रिते समये यत्र श्वा [३५०]सद्मोपरि संस्थितः।।५८।। भागः ३
(व.सं. अ. ३९ श्लो. ७५ पञ्चमपादः, श्लो. ७६ प्र.पादः)
तदस्थि [३५१]तद्विजानीत्षष्ट्यंगुलमिते क्षितौ।
[३५२]उन्मादे चागते तस्मिन्समये यत्र [३५३]संक्रिते।।५९।। भागः ३
(व.सं. अ. ३९ श्लो. ७६ द्वि.पादः, श्लो. ७७ प्र.पादः)
तदास्थि तत्र जानीयाद्धस्तद्वयमिते क्षितौ।
चाण्डाले जटिले चापि यदा तस्यां दिशि [३५४]क्षितौ।।६०।।भागः ३
(व.सं. अ. ३९ श्लो. ७७ द्वि.पादः, श्लो. ७८ प्र.पादः)
तदास्थि तत्र जानीयादशीत्यंगुलमानतः।
नृगजाश्वपशूनां हि त्वेकस्मिन् यत्र संस्थितिः।।६१।।भागः ३
(व.सं. अ. ३९ श्लो. ७८ द्वि.पादः, श्लो. ७९ प्र.पादः)
[३५५]तदस्थि तत्र जानीत्षष्ट्यंगुलमिते क्षितौ।
तस्मिन्नवसरे यत्र गृहदाहो भवेद्यदि।।६२।।भागः ३
(व.सं. अ. ३९ श्लो. ७९ द्वि.पादः, श्लो. ८० प्र.पादः)
मेषास्थि तत्र जानीयात्पुरुषा[३५६]ष्टप्रमाणतः।
सूत्रे विसूत्रिते तस्मिन् भिन्ने कुम्भेऽथवा यदि।।
आदिशेन्निधनं तत्र दम्पत्योः क्रमशस्तदा।।६३।। भागः ३

---

३४९ तत्र
३५० सूत्रो
३५१ थत्र
३५२ उच्चदेवागते
३५३ संस्थिते
३५४ स्थिते
३५५ तदास्थि
३५६ पुरुषस्य

(व.सं. अ. ३९ श्लो. ८० द्वि.पादः, श्लो. ८१ प्र.पादः)

पूर्वादिदिक्शिरा[३५७] वामपार्श्वशायी प्रदक्षिणम्।
[३५८]नरवास्तुश्चरत्येष पूजनीयो गृहाधिपैः।।८९।।भाग ४
(व.सं. अ. ३९ श्लो. ५८ द्वि.पादः, श्लो. ५९ प्र. पादः )
त्रिषु त्रिषु च मासेषु नभस्यादिषु च क्रमात्।
यद्दिङ्मुखो वास्तुनरस्तन्मुखं सदनं शुभम्।।[३५९]९२।।भागः ४
(व.सं. अ. ३९ श्लो. ५९ द्वि.पादः, श्लो. ६० प्र. पादः )
गजाये वा ध्वजाये वा गजानां [३६०]सदनं शुभम्।
अश्वालयं ध्वजाये च खराये [३६१]वृषभेऽपि वा।।१२७।।भागः ५
(व.सं. अ. ३९ श्लो. १८०)
उष्ट्राणां मन्दिरं कार्यं गजाये वा वृषे ध्वजे।
पशुसद्म वृषाये वा ध्वजाये वा शुभप्रदम्।।१२८।।भागः ५
(व.सं. अ. ३९ श्लो. १८१)
शय्यासु वृषभः शस्तः पीठे सिंहः शुभप्रदम्[३६२]।
अन्यत्रछत्रवस्त्राणां वृषाये[३६३] वा ध्वजेऽपि वा।।१२९।।भागः ५
(व.सं. अ. ३९ श्लो. १८२)
पादुकौपानहौ कार्यौ सिंहाख्येऽप्यथवा ध्वजे।
उक्तानामप्यनुक्तानां मन्दिराणां ध्वजः शुभः।।१३०।। भागः ५
(व.सं. अ. ३९ श्लो. १८३)
विस्तारायामगुणितं गृहस्य पदमुच्यते।
[३६४]तस्माद्धनाधनायर्क्षवासराख्या नवांशकाः।।१५९।। भागः ५

---

३५७ दिक्छिरो
३५८ चर
३५९ यदिङ्मुखो वास्तुपुरुषः सदनं तन्मुखं शुभम्।
३६० मन्दिरं
३६१ वृषेऽपि
३६२ प्रदः
३६३ वृषभाये

(व.सं. अ. ३९ श्लो.४७ )
गृहस्यागतभं यत्तु[३६५] तद्धि राश्यात्मकं भवेत्।
तन्नवांशवशात्तत्र ज्ञातव्यं सर्वथा[३६६] गृहे।।१६०।। भाग: ५
(व.सं. अ. ३९ श्लो.४८ )
गजरामांकवस्वंक-ऋतुभिर्गुणितात्पदात्।
सूर्योऽष्टाष्टर्क्षशैलांकविभक्तासवशेषका:[३६७]।।१६१।। भाग: ५
(व.सं. अ. ३९ श्लो.४९ )
पश्चिमे दक्षिणे चैव गवाक्षो मन्दिरस्य च।[३६८]
(व.सं. अ. ३९ श्लो.२१द्वि.पाद:)
स्वगृहात्पश्चिमे याम्ये पितृस्वाग्रजमन्दिरम्।।२८१।।भाग: ७
(व.सं. अ. ३९ श्लो.१८६ द्वि.पाद:)
[३६९]ईज्योत्तरात्रयाहीन्दुविष्णुधातृजलोडुषु।
गुरुणा सहितष्वेषु कृतं गेहं श्रिया युतम्।।४३१।।भाग: ९
(व.सं. अ. ३९ श्लो.३२ )
द्विदैवत्वाष्ट्रवारीश- रुद्रादितिवसूडुषु।
शुक्रयुक्तेषु तद्वारे कृतं गेहं धनप्रदम्।।[३७०]४३२।।भाग: ९
(व.सं. अ. ३९ श्लो.३३ )
गुरौ सिते वा सौम्ये वा गृहनिर्माणलग्नगे।
तद्वर्गे वा कृतं गेहं धनधान्यसुखप्रदम्।।४४१।। भाग:९
(व.सं. अ. ३९ श्लो.३५ )
स्वतुङ्गे गुरौ शुक्रे बुधे वा यदि लग्नगे।
तद्वर्गे वा कृतं गेहं सर्वसम्पत्प्रदं सदा।।४४२।। भाग: ९

---

३६४ तस्माद्धनऋणान्यर्क्ष
३६५ यत्र
३६६ सर्वदा
३६७ दवशिष्टका:
३६८ पश्चिमे द क्षिणे चापि कपाटं च शुभप्रदम्।।२१।।
३६९ इज्यो
३७० शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहम्।।।

(व.सं. अ. ३९ श्लो.३६ )
यत्रैकादशगे सौम्ये खेटे चन्द्रेऽथवा गुरौ।
अशत्रुनीचराशौ वा [३७१]तद्गृहं भूरिधामदम्[३७२]।।४४३।। भागः ९
(व.सं. अ. ३९ श्लो.३७ )
शुभे केन्द्रे त्रिकोणस्थे शत्रुनीचांशवर्जिते।
सदा लाभप्रदं गेहमुच्चगे[३७३] भूरिलाभदम्[३७४]।।४४४।। भागः ९
(व.सं. अ. ३९ श्लो.३८ )
शुभद्वये त्रयो वापि यस्मिन्निर्माणलग्नगे।
बहुकालस्थितं गेहं [३७५]दारपुत्रधनप्रदम्।।४४५।।भागः ९
(व.सं. अ. ३९ श्लो.३९ )
स्थिरराशौ[३७६] गते सूर्ये चरराशिगतेऽपि वा।
गृहारम्भः सदा कार्यो [३७७]द्विस्वभावे कदापि न।।४४६।। भागः ९
(व.सं. अ. ३९ श्लो.४० )

---

३७१ चेत्तद्गृहं
३७२ धान्यदम्
३७३ मुच्चस्थं
३७४ भूरिधान्यदम्
३७५ पुत्रपौत्रधनप्रदम्
३७६ राशि
३७७ न्न कार्यो द्विस्वभावगे